अर्जुन उवाच

मदनुग्रहाय परमं गुह्यमध्यात्मसञ्ज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥ ११.१॥

॥ ॐ ॥ पूर्वान्ते 'विष्टभ्याहमिदं कृत्स्नं' इति व्याप्तरूपोपासनं सङ्क्षेपेणोक्तम् । सङ्क्षेपेणोक्तरूपस्य बुद्धावनारोहेणाशक्य-ध्यानत्वात्तद्ध्यानसौकर्याय प्राक् सङ्क्षेपेणोक्तविश्वरूपस्थितिरत्र विस्तरेणोच्यत इति पूर्वानन्तर्यमर्थभेदश्चास्येति ध्येयम् । विश्वरूपं ज्ञातुं तत्प्रष्टु कामः प्रागुक्तमनुवदत्यर्जुनः ॥ मदनुग्रहायेति द्वाभ्याम् । परमं गुह्यमतिहोप्यं आत्मानं भगवन्तं अधिकृत्य स्थितमध्यात्मं अध्यात्मनामकं यद्वचः त्वया मदनुग्रहायोक्तम् । तेन बन्धुस्नेहादिरूपोऽयं मोहो विगतोऽपगतः मम ॥ ११.१॥

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ ११.२॥

हे कमलदलवदायतनेत्र । त्वत्तः भूतानां भवाप्ययौ । 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' (७.६) इत्यादिना सप्तमाध्यायादिषु विस्तरशो मया श्रुतौ अव्ययं माहात्म्यमपि च श्रुतम् ॥ ११.२॥

एवमेतद्यथाऽऽत्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ११.३॥

तद्वचनं स्तुवन् ज्ञातव्यविश्वरूपाविर्भावं प्रार्थयते ॥ एवमित्यादि द्वाभ्याम् । हे परमेश्वर यथा येन प्रकारेणात्मानं त्वमात्थ वदसि । एतद्वचनं एवमेव सत्यमेव । हे पुरुषोत्तम ऐश्वरमचिन्त्यशक्तिकं ते रूपं द्रष्टुमिच्चामि ॥ ११.३॥

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयाऽत्मानमव्ययम् ॥ ११.४ ॥

हे प्रभो समर्थ तद्रूपं मया द्रष्टुं शक्यमिति यदि मन्यसे । ततस्तर्हि योगेश्वर सर्वोपायपते । त्वमव्ययमात्मानं स्वरूपं मे मह्यं दर्शय । प्रार्थनायां लोट् । प्रभो इति वचनं तवातिसमर्थत्वात् त्वच्छक्त्यैवातीन्द्रियस्यापि दर्शनं स्यादिति ज्ञापनाय ॥ ११.४ ॥

श्रीभगवानुवाच

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ११.५ ॥

एवं कौतूहलान्वितेन पार्थेन प्रार्थितो भगवान् रूपं दिदर्शयिषुरादौ दर्शनं कुर्विति विधत्ते ॥ पश्येत्यादिना चतुष्टयेन । ते रूपं द्रष्टुमिच्छामीत्येकरूपदृष्टिप्रार्थनेऽपि दिव्यान्यप्राकृतानि । नानाभूताः शुक्लादिवर्णाः आकृतयः संस्थानविशेषाः येषां तानि । शतशः सहस्रशः बहूनीति यावत् । मे रूपाणि पार्थ पश्येति बहुरूपदर्शनोक्तिः एकस्यैव रूपस्याचिन्त्यशक्त्या विशेषबलेन चानन्तरूपसमुदायात्मकत्वाभिप्रायेणेति ज्ञेयम् । नानाविधानीत्यस्य विवरणं नानावर्णेत्यादि ॥ ११.५ ॥

पश्यादित्यान्वसून् रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याऽश्चर्याणि भारत ॥ ११.६ ॥

पश्येत्युक्तौ कस्तत्र विशेष इत्यत आह ॥ पश्येति । द्वादशादित्यानष्टौ वसूनेकादशरुद्रान् पञ्चाशन्मरुतः । तथाशब्दः समुच्चये । अदृष्टपूर्वाणि पूर्वमदृष्टानि बहूनि आश्चर्याणि अद्भुतानि च ॥ ११.६ ॥

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद् द्रष्टुमिच्छसि ॥ ११.७ ॥

ममदेहे मदीये रूपे पश्य । कृत्स्नमित्यस्य विवरणं सचराचरमिति । जगदिह तव प्रदर्शनीये मम देहे । एकस्थमेकदेशस्थमद्य पश्य हे गुडाकेश जितनिद्र । यच्चान्यद्द्रष्टुमिच्छसि तत्सर्वं मम देहे पश्य ॥ ११.७ ॥

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ११.८॥

त्वं द्रष्टुमिच्छसि । मयाऽप्युच्यते पश्येति । तथाऽपि त्वं त्वनेन स्वचक्षुषा मां द्रष्टुं न शक्यसे न शक्तो भविष्यसि । अतस्ते दिव्यं अलौकिकं चक्षुर्ददामि दर्शनशक्तिं ददामि । ऐश्वरं ईश्वरभूतमत्सम्बन्धियोगं सामर्थ्यं पश्येति ॥ ११.८॥

सञ्जय उवाच

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ११.९ ॥

अनन्तरवृत्तान्तं धृतराष्ट्रं प्रति सञ्जय उवाच । तदाह ॥ एवमिति । 'पश्य मे पार्थरूपाणि' इत्यादिप्रकारेणोक्त्वेत्यर्थः । महतां योगानामुपायानां अनन्तशक्तीनां वेश्वरः । कुत एतदित्यत उक्तम् ॥ हरिरिति । सर्वयज्ञादिभागहरणाद्धरिः । परममनेकविभवोपेतं । 'इडोपहूतं गेहेषु हरे भागं क्रतुष्वहम् । वर्णो मे हरितः श्रेष्ठः तस्माद्धरिरिति स्मृत ॥' इति मोक्षधर्मोक्तेः । गेहेषु इष्टिगृहेष्वित्यर्थः । हरतेरिकारप्रत्ययः । अप्राकृतविग्रहस्य साकारस्यानन्तपूजास्थानेषु युगपत्सन्निधानेन भागहारिणो महायोगेश्वरत्वं किं वक्तव्यमिति भावः ॥ ११.९ ॥

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ ११.१०॥

तद्रूपमाह ॥ अनेकेति । अनेकानि वक्त्राणि नयनानि यस्य तत् । अनेकशब्दोऽनन्तवाची । अनेकेषामद्भुतानां दर्शनं यस्मिन्नित्यनेकाद्भुतदर्शनं रूपं दर्शयामासेत्यनुषङ्गः ॥ ११.१०॥

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११.११॥

सर्वाश्चर्यमयं सर्वाश्चर्यात्मकम् । तादात्म्यार्थे मयट् । देवं क्रीडादिगुणम् । अनन्तं देशकालगुणापरिच्छिन्नम् । विश्वतोमुखं सर्वदिक्षु मुखं यस्य तद्विश्वतोमुखम् ।

अनन्तमुखमिति वा ॥ ११.११॥

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ ११.१२॥

किञ्च दिव्याकाशे सूर्यसहस्रस्यानन्तसूर्यराशेः युगपदुत्थितस्येति शेषः ।प्रभा युगपदुत्थिता स्यात्सा प्रभा तस्य महात्मनो विश्वरूपस्य भासः प्रभायाः सदृशी स्यात् नान्याऽस्त्युपमेत्यर्थः ॥ ११.१२॥

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ ११.१३॥

ततः किं जातमित्यत आह ॥ तत्रेति ।भगवता प्रदर्शिते सति देवदेवस्य शरीरे विश्वरूपे देवदानवमानवादिभेदेनानेकधा प्रविभक्तं कृत्स्नं जगदेकस्थमेकदेशस्थं तदाऽपश्यत् ॥ ११.१३॥

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ ११.१४॥

दर्शनानन्तरं किमकरोदित्यत आह ॥ तत इति ।दर्शनानन्तरम् ॥ ११.१४॥

अर्जुन उवाच

पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्वानुरगांश्च दिव्यान् ॥ ११.१५॥

किमभाषतेत्यतो दृष्टरूपानुवादपूर्वं स्तुतिमकरोदित्याह ॥ अर्जुन उवाचेत्यादिना ।सर्वान्देवान्सर्वान्प्राणिविशेषसमूहांश्चेत्यर्थः । ब्रह्माणं चतुर्मुखम् ।कमलासने चतुर्मुखे स्थितं ईशं रुद्रम् ।तदुक्तं पाद्मे ।'विष्णुं समाश्रितो ब्रह्मा ब्रह्मणोऽङ्कगतो हरः ।हरस्याङ्गविशेषेषु देवाः सर्वेऽपि संस्थिताः' इति । तव देहे देवानित्यत्रापि परम्परयेति ज्ञेयम् । दिव्यानद्भुतानुरगान्सर्पाञ्श्च तव देहे पश्यामि ॥ ११.१५॥

अनेकबाहूदरवक्त्रनेत्रं

पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवाऽदिं
पश्यामि विश्वेश्वर विश्वरूप ॥ ११.१६ ॥

'अनेकबाहूदरवक्त्रनेत्रं' इत्यत्रापि अनेकनयनमित्यत्रेवनेकशब्दो अनन्तवाची । प्रागुक्तानुवादरूपत्वादपौनरुक्त्यम् । सर्वतः सर्वस्मिन्देशे अनन्तान्यपरिमितानि रूपाणि यस्य तम् । हे विश्वरूप पूर्णरूप "सर्वं समस्तं विश्वं च अनन्तं पूर्णमेव च " इत्युक्तेः । विश्वेश्वर जगत्पते । तवादिं मध्यं अन्तं वा न पश्यामि । नञः त्रिरुक्तिरादरार्था । अत एवाद्यन्तयोरभावादेव मध्याभावसिद्धौ पुनर्मध्यं नेत्युपचारनिवृत्त्यर्थम् ॥ ११.१६ ॥

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्
दीप्तानलार्कद्युतिमप्रमेयम् ॥ ११.१७ ॥

दीप्तयोरनलार्कयोर्द्युतिरिव द्युतिः प्रकाशो यस्य तमित्युक्त्या प्राप्तपरिमितशङ्काव्युदासायोक्तमप्रमेयमिति अमितद्युतिमित्यर्थः ॥ ११.१७ ॥

त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥ ११.१८ ॥

परं निधानं मुक्ताश्रयः । शाश्वतधर्मगोप्ता अनादिपरम्पराप्राप्त-धर्मरक्षकः । अव्ययो ह्रासहीनः सनातनोऽनादिनित्यः पुरुषो मे मतः ॥ ११.१८ ॥

अनादिमध्यान्तमनन्तवीर्य-
मनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम् ॥ ११.१९ ॥

अनादिमध्यान्तं आदिमध्यान्तशून्यं गुणतोऽत्रादिमध्यान्तहीनत्वमुच्यते । 'नान्तं न मध्यं' इत्यत्र देशतः । अतो न पौनरुक्त्यम् । शशिसूर्यौ नेत्रयोर्यस्य तमिति वा जन्यजनकभावेन वाभेदोक्तिः । देवानां बहुरूपत्वादनेकाश्रयत्वं युक्तमिति 'चन्द्रमा मनसो जात'

(ऋग्वेदखिलेषु) इति मनोजाततया तदाश्रयत्वमप्यविरुद्धम् ।
दीप्तहुताशवक्त्रमिति जन्यजनकभावेनाश्रयाश्रियिभावेन वेति
ध्येयम् (ज्ञेयम्) ॥ ११.१९॥

द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं
लोकत्रयं प्रव्यथितं महात्मन् ॥ ११.२०॥

द्यावापृथिव्योरिदमन्तरं मध्यं एकेन त्वया एकरूपेण (त्वया) व्याप्तम् । रूपान्तरैस्तु सर्वा दिशो व्याप्ता इत्यर्थः । त्वयेत्येकवचनेनैवैकेनेति लाभे पुनरेकेनेत्युक्तिः एकेन रूपेण द्यावापृथिव्यन्तरव्याप्तिसूचनाय । हे महात्मंस्तवेदमुग्रं भयङ्करमद्भुतं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितं अतिभीतं पश्यामीत्यन्वयः । भूमेर्भारहाराय प्रवृत्तत्वादुग्रमिव न तूग्रमेव । तदुग्रत्वमपि केषाञ्चित्सम्हार्यत्वकारण-विशेषादनभ्यासरूपकारणाद्वा । अभ्यासे तु आनन्द एव तद्दर्शनाद्भवति । अत्र लोकत्रयपदेन लोकत्रयस्थभक्तवर्गग्रहः । अभक्तानां तद्दृष्टेरेवाभावात् । यद्वा तद्रूपमदृष्ट्वाऽपि मनसातदनुसन्धायैव बिभ्यज्जनं दृष्ट्वाऽर्जुनोऽहमिव एतेऽपि दृष्ट्वा बिभ्यतीति बुद्ध्वा लोकत्रयं प्रव्यथितं पश्यामीत्याहेति ज्ञेयम् । अस्मिन्पक्षे लोकत्रयशब्दो भक्ताभक्तवर्गपरः ॥ ११.२०॥

अमी हि त्वा सुरसङ्घा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥ ११.२१॥

अन्यदपि स्वदृष्टमाहार्जुनः ॥ अमी हीति । सुरसङ्घाः मुक्तदेववर्गाः । 'प्रवेशो निर्गमश्चैव मुक्तानां स्वेच्छया भवेत्' इति वचनात् । तेन 'पश्यामि देवांस्तव देव देहे' इत्यनेन न पौनरुक्त्यम् । अत्र मुक्तानां तत्रामुक्तानां उक्तेः । पुष्कलाभिर्गुणपूर्णाभिः स्तुतिभिः स्तुवन्ति ॥ ११.२१॥

रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसङ्घा
वीक्षन्ते त्वा विस्मिताश्चैव सर्वे ॥ ११.२२॥

ऊष्मपाः पितरः "ऊष्मभागा हि पितर" इति श्रुतेः ।
गन्धर्वादीनां सङ्घाः ॥ ११.२२॥

रूपं महत्ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम् ॥ ११.२३॥

बहुदंष्ट्राभिः करालं विरूपम् । लोकाः भक्तवर्गाः
भक्ताभक्तवर्गार्थत्वे तु लोकत्रयमित्यत्रेवाभिप्रायो ध्येयः ।
तथाऽहमपि प्रव्यथितः ॥ ११.२३॥

नभःस्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वा प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो ॥ ११.२४॥

व्यात्ताननं विवृतमुखम् । अन्तरात्मा मनः । न विन्दामि न प्राप्नोमि ।
शमं सुखं च न विन्दामि । न प्राप्नोमि । विष्णुशब्दार्थ उक्तः
दशमेऽध्याये ॥ ११.२४॥

दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास ॥ ११.२५॥

दंष्ट्राकरालानि दंष्ट्राभिर्विरूपाणि । कालेति प्रलयकालाग्निसन्निभानि
समप्रभाणि । न जाने न जानामि । शर्म सुखं च न विन्दामि ।
जगन्निवास जगदाधार ॥ ११.२५॥

अमी च त्वा धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ
सहास्मदीयैरपि योधमुख्यैः ॥ ११.२६॥

दंष्ट्राकरालानि दंष्ट्राभिर्विरूपाणि । कालेति प्रलयकालाग्निसन्निभानि

समप्रभाणि । न जाने न जानामि । शर्म सुखं च न विन्दामि । जगन्निवास जगदाधार ॥ ११.२६॥

वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ ११.२७॥

ते प्रागुक्तधृतराष्ट्रपुत्रादयः ते तव वक्त्राणि विशन्तीत्यत्र तेषां भगवन्मुखाभिमुखचेष्टाभावेपि भगवानेवानेकमुखैः सेनाद्वयस्थयोधान् ग्रसित्वा तिष्ठतीत्युपचारेण विशन्तीत्युक्तिर्ज्ञेया । एवमग्रेऽपि । केचित्तस्मिन्मुहूर्त एव मरिष्यमानाः । केचिद्दशनान्तरेषु विलग्नाः चूर्णितैः शतशः सूक्ष्मरेखोपेतशीर्णघटवत् शतशः सूक्ष्मरेखोपेततया भिन्नैः उत्तमाङ्गैः शिरोभिरुपलक्षिताः सन्तः दृश्यन्ते मयेत्यर्थः । मदंदृष्टीनां अन्येषां तथा दृष्ट्यभावेऽप्यर्जुनस्य दिव्यदृष्टिमत्त्वात्तथा दर्शनं युक्तमिति ज्ञेयम् । यथाऽन्यैरदृष्टापि पूरूरवसो जराश्विभ्यां दृष्टा तथेति । व्यक्तमेतद्विष्णुधर्मे एकोनविंशेऽध्याये । (तथा हि स पुरूरवसो रूपं द्रष्टुमागतावश्विनौ प्रति पुरूरवो राजा तैलाभ्यक्तः संस्नातः भूषणयुतः सन्नागमिष्यामि तदा मद्रूपं द्रष्टव्यमित्युक्ते "अप्रसाधितमेवाशु भवन्तं वसुधाधिप (???) पश्यावो भूषितं त्वां वै वस्त्रालङ्करणान्वितम् ।" इत्यश्विभ्यामुक्तेतूष्णीं बहिर्गतस्यराज्ञः साङ्गोपा गादिकं सर्वं समपश्यताम् । "शिरोललाटबाहूवास्यनयनादिविलोकनम् । कृत्वा चिरं महीपालमूचतुस्तावरिन्दमौ ॥ प्रविश्य स्नास्य भूपाल यथार्हैश्च विभूषणैः । विभूषिततनुं भूयस्त्वां द्रक्ष्यावो नरेश्वरम् ॥" इत्यश्विभ्यामुक्तो राजा गृहं प्रविश्य स्नात्वाऽनुलिप्तो वस्त्रालङ्कारादिभूषितः सन्नश्विनोः समीपमागतः । तदा तौ तद्रूपं दृष्ट्वा हासं चक्रतुः । तदा राज्ञा हासकारणे पृष्टे "श्रुणु भूपाल सकलमावयोर्हासकारणम् । युष्मद्दर्शनसम्भूतं क्षणापचयहेतुकम् ॥ अतस्तस्याभवत्पूर्वं यादृशी ते स्वरूपता । साम्प्रतं तादृशी नेयं भूषितस्यापि भूषणैः ॥ दिव्येन चक्षुषा भूप कालस्यास्य च तस्य च । वपुः परिणतिं स्वस्मात् पश्यावोपचयप्रदाम् ॥" इत्यादिनेति भावः ।) ॥ ११.२७॥

यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा

विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ ११.२८ ॥

विज्वलन्ति दीप्यमानानि वक्त्राणि ॥ ११.२८ ॥

यथा प्रदीप्तं ज्वलनं पतङ्गा
विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकाः
तवापि वक्त्राणि समृद्धवेगाः ॥ ११.२९ ॥

'तवापि वक्त्राणि समृद्धवेगा' इत्यत्र भगवता अतितीव्रं ग्रस्यमानत्वात्तथोपचर्यन्त इति भावः ॥ ११.२९ ॥

लेलिह्यसे ग्रसमानः समन्तात्
लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो ॥ ११.३० ॥

समग्रान्लोकान् जनान् ज्वलद्भिर्वदनैः समन्ताद्ग्रसमानः मुखान्तःकुर्वाणः लेएलिह्यसे । कोपेन रुधिरासिक्तमोष्ठ पुटादिकं जिह्वाग्रेणास्वादयसीवासकृत्स्पृशसि । हे विष्णो तवोग्राः तीक्ष्णा भासः प्रभाः तेजोभिः प्रकाशनशक्तिभिः समग्रं जगदापूर्य व्याप्य प्रतपन्ति देहादिपदार्थेषूष्माणं (उष्णिमानं) जनयन्ति ॥ ११.३० ॥

आख्याहि मे को भवानुग्ररूपो
नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ॥ ११.३१ ॥

भगवत्स्वरूपं तदीयगुणकर्माणि जानन्नप्यर्जुनः अज्ञातगुणकर्मविशेषज्ञानार्थं पृच्छति ॥ आख्याहीति । उग्ररूपो भवान्कः किंधर्मकः किमर्थमुग्ररूप इत्यर्थः ॥ ११.३१ ॥

श्रीभगवानुवाच

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः ।

ऋतेऽपि त्वा न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ११.३२॥

एवमर्थितो भगवान्स्वगुणादीनाह ॥ कालोऽस्मीति । "कल बन्धने कल संहरणे कल ज्ञाने कल विद्रावणे कल कामधेनुरि"ति धातुपाठात् । पूर्ण(षड्)सद्गुणैः कलितत्वात् सम्बद्धत्वात्कालः पूर्णसद्गुणो(षड्गुणो)ऽस्मीत्यर्थः । तथा जगद्बन्धनसंहरणबोधन-विद्रावणादिकर्मयुक्तत्वाच्च कालोऽस्मीत्यर्थः । कलतेः कर्मणि कर्तरि च अण्, घञ्प्रत्ययो वा । किमर्थमुग्ररूप इत्यस्योत्तरं ॥ लोकक्षयकृदित्यादि । प्रवृद्धो देशकालतः परिपूर्णाः । अनादिनित्य इति वा । लोकस्य क्षयकृद्धवन्निह युद्धमण्डलगतान् लोकान् जनान्प्रत्यक्षत एव संहर्तुं प्रवृत्तोऽस्मि । तर्हि पार्थानामपि संहर्तुं प्रवृत्तः किमित्यत आह ॥ ऋतेऽपीति । अपिर्धर्मादिसमुच्चये । धर्मादिपञ्चपाण्डवान् अश्वत्थामकृतवर्मकृपाञ्श्च विनेत्यर्थः । प्रत्यनीकेषु परस्परं प्रतिस्पर्धितया स्थिते सेनाद्वये । अक्षौहिणिबहुत्वाभिप्रायेण बहुवचनम् । येऽवस्थिता योधास्ते सर्वे न भविष्यन्तीत्यर्थः ॥ ११.३२॥

तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥ ११.३३॥

पूर्वं द्वितीये 'न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः' (२.६) इति वदन्तं पार्थं प्रति सन्देहेऽपि युद्धे प्रवृत्तिर्युक्ता । पक्षद्वयेऽपि फललाभात् । 'हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्' (२.३७) इत्युत्तरमुक्तम् । इदानीं तव पराजयशङ्का नास्तीत्याह ॥ तस्मादितिद्वयेन । यस्मादहमेव लोकान्समाहर्तुं इह प्रवृत्तः । तस्माद्विजये सन्देहाभावादुत्तिष्ठ योद्धुं सन्नद्धो भव । शत्रून् जित्वा यशो लभस्व समृद्धं राज्यं भुङ्क्ष्व । पूर्वमेव मया निहताः निहतप्रायाः अपहृतायुष्ट्वेन सन्निहितमरणाः सन्ति । तान्प्रत्यक्षतो हन्तुं हे सव्यसाचिन् त्वं निमित्तमात्रं भव । पश्चादपि त्वयि स्थित्वाऽहमेव हनिष्यामीति भावः ॥ ११.३३॥

द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथाऽन्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा

युध्यस्व जेतासि रणे सपत्नान् ॥ ११.३४ ॥

ननु द्रोणो धनुर्विद्याचार्यः भीष्मः स्वच्छन्दमृत्युः ।
योऽस्य शिरःछित्वा भूमौ पातयेत्तच्छिरो भेत्स्यत इति
पितुर्वरेण बलिष्ठः सैन्धवः । वासवशक्त्या कर्णो बलवान् ।
एवमन्ये च बलिष्ठाः सन्ति । ते कथं मया जेया इत्यत आह ॥
द्रोणं चेति ॥ ११.३४ ॥

सञ्जय उवाच

एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाऽह कृष्णं
सगद्गदं भीतभीतः प्रणम्य ॥ ११.३५ ॥

ततः किं जातमिति धार्तराष्ट्रहार्दं परिहर्तुं सञ्जय उवाच
किमित्यत आह ॥ एतदित्यादिना । वेपमानः भयकम्पिताङ्गः ।
भीतभीतः अत्यन्तभीतः ॥ ११.३५ ॥

अर्जुन उवाच

स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥ ११.३६ ॥

तद्वचनमाह ॥ स्थान इत्यादिना । हे हृषीकेश सर्वेन्द्रियप्रेरक
तव प्रकीर्त्या जगत्प्रहृष्यति अनुरज्यते चेत्यादि (कं) स्थाने ।
अव्ययमेतत् । युक्तमेवेत्यर्थः ॥ ११.३६ ॥

कस्माच्च ते न नमेरन्महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ॥ ११.३७ ॥

कथं युक्तमित्यत आह ॥ कस्मादिति । हे महात्मन्महाञ्श्चासावात्मा

च तस्य सम्बुद्धिः महात्मन् । महच्छब्दोऽत्रपूर्णवाची । आत्मशब्दोऽपि 'यच्चाप्नोति' (भारते) इत्यादिस्मृतेरास्यादान-विषयानुभवनित्यसत्तारूपार्थचतुष्टयवाची । पूर्णास्यादिमन्नित्यर्थः । गरीयसे गुरुतमाय ब्रह्मणश्चतुर्मुखस्याप्यादिकर्त्रे ते तुभ्यं कस्मान्न नमेरन् । नमेयुरेव । अनन्त अन्तशून्य । (देवेश) देवानामीश । जगन्निवास जगदाश्रय । यत्सदसद्भावात्मकं जगत्तत्परं तदुत्तममक्षरम् । त्वमेवेत्यर्थः ॥ ११.३७ ॥

त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ॥ ११.३८ ॥

निधानमाश्रयः । वेत्ताऽसि वेदिताऽसि परिज्ञाताऽसि । वेद्यं च त्वमेव । परं धाम तेजोजातं च त्वमेव । अनन्तरूप । कालतोऽतहीनं रूपं यस्य तस्य सम्बुद्धिः । न च 'नान्तं न मध्यं न पुनस्तवादिं पश्यामि' इत्यनेन "त्वया ततमि"त्यस्य पौनरुक्त्यं शङ्क्यम् । नान्तं पश्यामीत्युक्ते विद्यमानमप्यन्तं स्वयं न पश्यामीत्यपि प्रतीत्या परिमाणानन्त्यं नेश्वरस्य सिध्यतीत्यतो न केवलमहं न पश्यामि । त्वया ततं च विश्वमित्युक्तत्वेन सप्रयोजनत्वान्न पुनरुक्तिरिति ज्ञेयमिति । 'द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः' इति । 'त्वया ततं विश्वमनन्तरूपं' इत्याद्यभ्यासो विष्णोर्देशकालगुणैः आनन्त्ये स्वस्य महातात्पर्यज्ञापनार्थं इति न पौनरुक्त्यं शङ्क्यम् ॥ ११.३८ ॥

वायुर्यमोऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते ॥ ११.३९ ॥

गुणान्तरयुक्तत्वेन पुनः स्तौति ॥ वायुरिति । वायुर्बलज्ञानरूपः । यमः दोषोपरतिमान् । अग्निः स्वतो गतिहीनजगन्नेता । वृणुते भक्तानिति वरुणः । अतिसुखाङ्कितत्वात् शशाङ्कः । प्रजापालनात् प्रजापतिः ॥ ११.३९ ॥

नमः पुरस्तादथ पृष्ठतस्ते

नमोऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं
सर्वं समाप्नोषि ततोऽसि सर्वः ॥ ११.४०॥

सर्वतः दक्षिणोत्तरादिसर्वपार्श्वेभ्यः नमोऽस्तु ते । हे सर्व परिपूर्ण । ननु 'सर्वं खल्विदं ब्रह्म' (छा.३.१४.१) इति श्रुतौ इदं सर्वं च जगद्ब्रह्मेति सर्वस्य जगतो ब्रह्मात्मकत्वोक्तेः "त्वमस्य विश्वस्य परं निधानम् । त्वया ततमिदं विश्वमि"त्याद्ययुक्तमित्यतः श्रुतिगतसर्वशब्दार्थमाह ॥ सर्वमिति । सर्वं विश्वं समाप्नोषि व्याप्नोषि यतः ततः सर्वोऽसि । "सर्वं खल्विदं ब्रह्म" (छा. १.१४.१) ??? 'पुरुष एवेदं सर्वं' (तै.आ. ३.१२) इत्यादिश्रुतिस्थसर्वशब्दवाच्योऽसि । इदं ब्रह्म सर्वं खलु सर्वजगद्व्यापि खल्वित्यादिरूपेण श्रुत्यर्थो ज्ञेयः । न तु जगदात्मकत्वेनेत्यभिप्रायः ॥ ११.४०॥

सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वाऽपि ॥ ११.४१॥

एतादृशमाहात्म्यं भगवन्तं प्रति यदपराद्धं तत्क्षन्तव्यमित्याह ॥ सखेत्यादिना । इदं प्रागुक्तं जगत्स्रष्टृत्वादिकं महिमानं अजानता मया प्रमादात्पारवश्यात्प्रणयेन वा स्नेहेन वा सखेति मत्वा हे कृष्ण हे यादव हे सखेति प्रसभं अबहुमानं यथा तथा यदुक्तं तत्क्षामये क्षमापये इत्यग्रेतनेनान्वयः । हे सख इति विच्छिद्य वक्तव्ये सन्धिश्छान्दसः ॥ ११.४१॥

यच्चापहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युत तत्समक्षं
तत्क्षामये त्वामहमप्रमेयम् ॥ ११.४२॥

किञ्च अथवेति पक्षान्तरे । हे अच्युत सर्वगुणैश्च्युतिहीन । विहारः क्रीडा तदादिषु एकोऽपि त्वं सर्वोत्तमोऽपि असत्कारानर्होऽपि इति यावत् । यदपहासार्थमसत्कृतोऽपि अवमतोऽसि । तदप्रमेयं त्वां समक्षं त्वत्पुरतोऽहं क्षमापये क्षमस्वेति प्रार्थये । एकशब्दे ए शब्द एकवाची । कशब्दस्तु करोतेरन्तर्णीतण्यर्थात् केवलाद्वा डप्रत्यये क इति कर्तुवाची कारयितृवाची च । ए एकोऽसहाय एव

कः कर्ता कारयिता चेत्येकः सर्वोत्तमः अन्यनिरपेक्षकर्तृत्वादिमत
एव सर्वोत्तमत्वादिति । अत्र एकशब्दः सर्वोत्तमपरो ध्येयः ॥ ११.४२॥

पिताऽसि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ११.४३॥

असत्कारानर्हतामेव गुणान्तरोक्त्या व्यनक्ति ॥ पितासीत्यादिना । त्वमस्य
चराचरस्य लोकस्य पिताऽसि जनकोऽसि । अत एव पूज्यो गरीयान्
गुरुरत्यन्तं गुरुश्च अप्रतिमप्रभाव अनुपमैश्वर्य ॥ ११.४३॥

तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ॥ ११.४४॥

यस्मादुक्तमहामहिमा तस्मात्कायं भूमौ प्रणिधाय ईशमीड्यं
स्तुत्यं त्वा त्वां प्रणम्य प्रसादये । हे देव पित्रादिः
पुत्रादेरिवापराधं सोढुमर्हसि ॥ ११.४४॥

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं
प्रसीद देवेश जगन्निवास ॥ ११.४५॥

एवं क्षमाप्य प्रार्थयते ॥ अदृष्टेति । हे देव
पूर्वमदृष्टमदृष्टपूर्वं तव रूपं दृष्ट्वा हृषितोऽस्मि ।
तथा भयेन च मे मनः प्रव्यथितं प्रचलितम् । अतो हे
देवेश जगन्निवास तदेव रूपं मे दर्शय प्रसीद ॥ ११.४५॥

किरीटिनं गदिनं चक्रहस्त-
मिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्ते ॥ ११.४६॥

तदेवेत्युक्तं रूपमाह ॥ किरीटिनमिति । यथा विश्वरूपं

दृष्टवानस्मि तथैव तेनैव पूर्वदृष्टेन चतुर्भुजेन रूपेण
त्वां द्रष्टुमिच्छामि । हे सहस्रबाहो अनन्तबाहो विश्वमूर्ते
गुणपूर्णविग्रहेति वा विश्वस्मिन्मूर्तिर्यस्येति वाऽर्थः ॥ ११.४६॥

श्रीभगवानुवाच

मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ११.४७॥

भक्त्यतिशयोत्पादनाय विश्वरूपप्रदर्शनस्य दौर्लभ्यमाह ॥ मयेति ।
हे अर्जुन प्रसन्नेन मया आत्मयोगात् स्वरूपसामर्थ्यात्परमुत्तमं
इदं रूपं तव दर्शितम् । तद्विशिनष्टि ???। तेजोमयं
प्रचुरतेजस्स्वरूपम् । विश्वं पूर्णं त्रनन्तं देशकालापरिच्छिन्नं,
आद्यं त्वदन्येन न दृष्टपूर्वमित्यस्य
त्वत्तोऽधमैरदृष्टपूर्वमित्यर्थः । तैरपि स्वयोग्यतानुरोधेन
दृष्टत्वेऽपि अर्जुनवन्न दृष्टमित्यदृष्टत्वोक्तिः । तथा
त्वया त्विन्द्रशरीरेण दृष्टपूर्वमित्यपि त्वदन्तेनेति
विशेषणाल्लभ्यते । यन्मे रूपं दर्शितमित्यन्वयः । अत्र
विश्वरूपस्य परमित्युत्तमत्वोक्तिः अज्ञजनापेक्षयैव । ब्रह्मादीनां
कृष्णाद्यवतारेष्वपि परत्वधीसत्त्वादिति ॥ ११.४७॥

न वेद यज्ञाध्ययनैर्न दानैः
न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ११.४८॥

ननु अर्जुनादवरैः स्वतोऽर्जुनवन्न दृष्टमपि विश्वरूपं
वेदादिसाधनैरर्जुनेनेव तदवरैरपि तथा दृष्यतामित्यत आह ॥
न वेदेति । वेदानां यज्ञानां चाध्ययनैरग्निहोत्रादिक्रियामिः ।
उग्रैः कृच्छ्रचाँद्रायणादितपोभिरेवंरूपः प्राक्
प्रदर्शितविश्वरूपोऽहं नृलोके त्वदन्तेन त्वत्तोऽवरेण
त्वद्वद्द्रष्टुं न शक्य इत्यर्थः । सर्वात्मनाऽर्जुनादन्येनादृष्टार्थत्वे
'दृष्ट्वाऽद्भुतं रूपमि"ति प्रागुक्तविरोध इति ज्ञेयम् ॥ ११.४८॥

मा ते व्यथा मा च विमूढभावो

दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥ ११.४९ ॥

अदृष्टपूर्वमित्यादिना प्रार्थितस्योत्तरमाह ॥ मा त इति । घोरं संहर्तृरूपं ईदृगीदृशं अनन्तबाह्वादिरूपं दृष्ट्वा ते व्यथा माऽस्तु । विमूढभावो विमूढत्वं च माऽस्तु । व्यपगतभयः प्रीतमनाश्च सन्पुनस्त्वं तदेव रूपं पूर्वदृष्टमेव रूपं प्रपश्येति ॥ ११.४९ ॥

सञ्जय उवाच

इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ११.५० ॥

ततः किं जातमिति धार्तराष्ट्रहार्दं निरसितुं 'सञ्जय उवाच इत्यर्जुनमि'त्यादिना । इत्युक्त्वेत्यन्वयः । तथाशब्दः समुच्चये । स्वकं रूपं दर्शयामास चेत्यर्थः । स्वं स्वङ्कीयतया प्रदर्शनीयमित्यर्थः । विश्वरूपं न स्वकीयं इदं तु स्वकीयमिति लोकभ्रान्तिविषयमिति यावत् । भीतमेनं भूय आश्वासयामास च । किं कृत्वा महात्मा सौम्यवपुर्भूत्वेति ॥ ११.५० ॥

अर्जुन उवाच

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ११.५१ ॥

विश्वरूपतिरोधानेन कृष्णरूप (प्र)दर्शनेनाश्वासितोऽस्मीत्याहार्जुनो दृष्ट्वेति । किञ्च मनुष्यवद्दृष्यमानत्वात् मानुषं इदं सौम्यमक्रूरं इदं तव रूपं दृष्ट्वा इदानीं सचेताः प्रसन्नचित्तः संवृत्तो जातोऽस्मि । प्रकृतिं पूर्वस्वभावं स्वस्थतां गतोऽस्मीत्युवाचेत्यन्वयः । ११.५१ ॥

श्रीभगवानुवाच

सुदुर्दर्शमिदं रूपं दृष्ट्वानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ ११.५२॥

भयङ्करं रूपं किमर्थं दर्शितवानसीत्यतः
विश्वरूपदृष्टेर्महिमानमाह भगवान् ॥ सुदुर्दर्शमिति ।
यन्मम रूपं दृष्टवानसि । अस्य रूपस्य नित्यं दर्शनकाङ्क्षिणो
ये देवाः तेऽपि यद्दृष्टवन्तस्तदिदं सुदुर्दर्शम् ।
केषाञ्चित्सुखेन दर्शनीयम् । केशाञ्चित्सुखेन दुःखेन च
दर्शनीयमित्यर्थः । देवानामप्यपेक्षितत्वात्तव शत्रुवधे
निमित्तमात्रत्वज्ञापनाय चैतद्रूपं दर्शितमिति भावः ॥ ११.५२॥

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ११.५३॥

किञ्चातिदुर्लभदर्शनं ते मया कारितमिति भावेनाह ॥ नाहमिति ।
यथा दृष्टवानसि एवंविधो विश्वरूपवानित्यर्थः ॥ ११.५३॥

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च परन्तप ॥ ११.५४॥

केनोपायेन द्रष्टुं शक्य इत्यत आह ॥ भक्त्येति । वेदादितो
विशेषद्योतकस्तुशब्दः । अनन्ययाऽन्यासाधारणया असहाययेति वा ।
तत्त्वेन ज्ञातुं द्रष्टुं प्रवेष्टुं सायुज्यं प्राप्तुं च शक्योऽहमिति ॥ ११.५४॥

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ ११.५५॥

अनन्ययेत्युक्त्या जातान्यत्यागभ्रान्तिं निराह ॥ मत्कर्मकृदिति ।
अहमेव परमो यस्य स तथा । मदुत्तमताज्ञानवानित्यर्थः ।
सङ्गवर्जितः फलस्नेहहीनः यः स मामेतीति ॥ ११.५५॥

इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते

एकादशोऽध्यायः